# श्रीमद्भगवद्गीता

# Śrīmad-Bhagavad-gītā

# The Song of the Lord

# Chapter Fourteen

with the comms. of Śrīdhara, Viśvanātha, and Baladeva

Version 0.1

March 27, 2001

# Chapter 14

# अथ चतुर्दशोऽध्यायः

श्रीभगवान् उवाच
परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानम् उत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिम् इतो गताः ॥१ ॥

## श्रीधरः

पुंप्रकृत्योः स्वतन्त्रत्वं वारयन् गुणसङ्गतः ।
प्राहुः संसारवैचित्र्यं विस्तरेण चतुर्दशे ॥

यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम् । क्षेत्रक्षेत्रज्ञसंयोगात् तद् विद्धि भरतर्षभ ॥ इत्युक्तम् । स च क्षेत्रक्षेत्रज्ञयोः संयोगो निरीश्वरसाङ्ख्यानाम् इव न स्वातन्त्र्येण । किन्तु ईश्वरेच्छयैवेति कथनपूर्वकं कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु इत्यनेनोक्तं सत्त्वादिगुणीकृतं संसारवैचित्र्यं प्रपञ्चयिष्यन् एवम्भूतं वक्ष्यमानम् अर्थं स्तौति भगवान् परं भूय इति द्वाभ्याम् । परं परमात्मनिष्ठम् । ज्ञायते अनेनेति ज्ञानम् उपदेशः । तज्ज्ञानं भूयोऽपि तुभ्यं प्रकर्षेण वक्ष्यामि । कथम्भूतम् । ज्ञानानां तपःकर्मादिविषयाणां मध्य उत्तमम् । मोक्षहेतुत्वात् । तद् एवाह यज्ज्ञात्वा मुनयो मननशीलाः सर्वे । इतो देहबन्धनात् । परां सिद्धिं मोक्षम् । गताः प्राप्ताः ॥१ ॥

## विश्वनाथः

गुणाः स्युर् बन्धकास्ते तु फलैर् ज्ञेयाश्चतुर्दशे ।
गुणात्यये चिह्नततिर् हेतुर् भक्तिश्च वर्णिता ॥

पूर्वाध्याये कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु इत्युक्तम् । तत्र के गुणाः, कीदृशो गुणसङ्गः, कस्य गुणस्य सङ्गात् किं फलं स्यात्, गुणयुक्तस्य किंवा लक्षणम् । कथं वा गुणेभ्यो मोचनम् इत्यपेक्षायां वक्ष्यमानम् अर्थं स्तुवानो वक्तुं प्रतिजानीते परम् इति । ज्ञायतेऽनेनेति ज्ञानम् उपदेशः परम् अत्युत्तमम् ॥१ ॥

**बलदेव**:

गुणाः स्युर् बन्धकास्ते तु परिचेयाः फलैस्त्रयः ।
मद्भक्त्या तन्निवृत्तिः स्याद् इति प्रोक्तं चतुर्दशे ॥

पूर्वाध्याये मिथःसम्पृक्तानां प्रकृतिजीवेश्वराणां स्वरूपाणि विविच्य जानन्न् अमानित्वादिधर्मैर् विशिष्टः प्रकृतिबन्धाद् विमुच्यते बन्धहेतुश्च गुणसङ्ग इत्युक्तम् । तत्र के गुणाः, कस्मिन् गुणे कथं सङ्गः, कस्य गुणस्य सङ्गात् किं फलं, गुणसङ्गिनः किंवा लक्षणं कथं वा गुणेभ्यो मुक्तिः इत्यपेक्षायां वक्ष्यमाणम् अर्थम् आत्मरुच्युत्पत्तये भगवान् स्तौति परम् इति द्वाभ्याम् ।

परं पूर्वोक्ताद् अन्यं प्रकृतिजीवान्तर्गतम् एव गुणविषयकं ज्ञानं भूयो वक्ष्यामि यज्ज्ञानानां प्रकृतिजीवविषयकाणाम् उत्तमं श्रेष्ठं नवनीतवद् उद्धृतत्वात् । यज्ज्ञात्वोपलभ्य सर्वे मुनयस्तन्मननशीला इतो लोके परम् आत्मयाथात्म्योपलब्धिलक्षणां सिद्धिं गताः । यद् वा ज्ञायतेऽनेनेति ज्ञानम् उपदेशम्, तच् च प्राग् उक्तम् अपि भूयः पुनर् विधान्तरेण वक्ष्यामि । तच् च ज्ञानानां तपःप्रभृतीनां ज्ञानसाधनानां मध्ये परम् उत्तमम् अत्युत्तमं तदन्तरङ्गसाधनत्वात् । यज्ज्ञात्वा सर्वे मुनय इतो लोकात् परां मोक्षलक्षणां सिद्धिं गताः ॥१ ॥

**इदं ज्ञानम् उपाश्रित्य मम साधर्म्यम् आगताः**
**सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥२ ॥**

**श्रीधर**: किं च इदम् इति । इदं वक्ष्यमाणं ज्ञानम् उपाश्रित्येदं ज्ञानसाधनम् अनुष्ठाय मम साधर्म्यं मद्रूपत्वं प्राप्ताः सन्तः सर्गेऽपि ब्रह्मादिषु उत्पाद्यमानेष्वपि नोत्पद्यन्ते । तथा प्रलयेऽपि न व्यथन्ति । प्रलये दुःखं नानुभवन्ति । पुनर् नावर्तन्त इत्यर्थः ॥२ ॥

**विश्वनाथ**: साधर्म्यं सारूप्यलक्षणां मुक्तिं । न व्यथन्ति न व्यथन्ते ॥२ ॥

**बलदेव**: इदम् इति । गुरूपासनयेदं वक्ष्यमाणं ज्ञानम् उपाश्रित्य प्राप्य जनाः सर्वेशस्य मम नित्याविर्भूतगुणाष्टकस्य साधर्म्यं साधनाविर्भावितेन तदष्टकेन साम्यम्

आगताः सन्तः सर्गे नोपजायन्ते सृजिकर्मतां नाप्नुवन्ति प्रलये न व्यथन्ते मृतिकर्मतां च न यान्तीति जन्ममृत्युभ्यां रहिता मुक्ता भवन्तीति मोक्षे जीवबहुत्वम् उक्तम् । तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः इत्यादिश्रुतिभ्यश्चैतद् अवगतम् ॥ २ ॥

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥

**श्रीधरः** तद् एवं प्रशंसया श्रोतारम् अभिमुखीकृत्येदं परमेश्वराधीनयोः प्रकृतिपुरुषयोः सर्वभूतोत्पत्तिं प्रति हेतुत्वं न तु स्वतन्त्रयोर् इतीमं विवक्षितम् अर्थं कथयति ममेति । देशतः कालतश्चापरिच्छिन्नत्वान् महत् । बृंहितत्वात् स्वकार्याणां वृद्धिहेतुत्वाद् वा ब्रह्म । प्रकृतिर् इत्यर्थः । तन् महद् ब्रह्म मम परमेश्वरस्य योनिर् गर्भाधानस्थानम् । तस्मिन्न् अहं गर्भं जगद्विस्तारहेतुं चिदाभासं दधामि निक्षिपामि । प्रलये मयि लीनं सन्तम् अविद्याकामकर्मानुशयवन्तं क्षेत्रज्ञं सृष्टिसमये भोगयोग्येन क्षेत्रेण संयोजयामीत्यर्थः । ततो गर्भाधानात् सर्वभूतानां ब्रह्मादीनां सम्भव उत्पत्तिर् भवति ॥ ३ ॥

**विश्वनाथः** अथ अनाद्यविद्याकृतस्य गुणसङ्गस्य बन्धहेतुताप्रकारं वक्तुं क्षेत्रक्षेत्रज्ञयोः सम्भवप्रकारम् आह मम परमेश्वरस्य योनिर् गर्भाधानस्थानं महद् ब्रह्म देशकालानवच्छिन्नत्वात् महत्, बृंहणात् कार्यरूपेण वृद्धेर् हेतोर् ब्रह्म प्रकृतिर् इत्यर्थः । श्रुतावपि क्वचित् प्रकृतिर् ब्रह्मेति निर्दिश्यते । तस्मिन्न् अहं गर्भं दधाम्यादधामि । इतस्त्वन्यां प्रकृतिं विद्धि मे परां जीवभूताम् इत्यनेन चेतनपुञ्जरूपा या जीवप्रकृतिस्तटस्थशक्तिरूपा निर्दिष्टा सा सकलप्राणिजीवतया गर्भशब्देनोच्यते । ततो मत्कृतात् गर्भाधानात् सर्वभूतानां ब्रह्मादीनां सम्भव उत्पत्तिः ॥ ३ ॥

**बलदेवः** तद् एवं वक्तव्यार्थस्तुत्या तस्मिन् रुचिं श्रोतुर् उत्पाद्य भूमिर् आपः इत्यादिद्वयार्थानुसारात् यावत् सञ्जायते किञ्चित् इत्यादौ प्रकृतिजीवसंयोगं परेशहेतुकम् अभिमतम् इह स्फुटयति ममेति । महत् सर्वस्य प्रपञ्चस्य कारणं ब्रह्माभिव्यक्तसत्त्वादिगुणकं प्रधानं मम सर्वेश्वरस्याण्डकोटिस्रष्टुर् योनिर् गर्भधारणस्थानं भवति । प्रधाने ब्रह्मशब्दश्च तस्माद् एतद् ब्रह्म नामरूपम् अन्नं च जायते । इति श्रुतेः । तस्मिन् महति ब्रह्मणि योनिभूते गर्भं परमाणुचैतन्यराशिम् अहं दधाम्यर्पयामि भूमिर् आपः इत्यादिना या जडा प्रकृतिर् उक्ता । सेह महद् ब्रह्मेत्युच्यते । इतस्त्वन्याम् इत्यादिना या चेतना प्रकृतिर् उक्ता सेह सर्वप्राणिबीजत्वाद् गर्भशब्देनेति भोगक्षेत्रभूतया जडया प्रकृत्या सह चेतनभोक्तृवर्गं संयोजयामीत्यर्थः । ततो महद्धेतुकात् प्रकृतिद्वयसंयोगाद् गर्भाधानाद् वा सर्वभूतानां ब्रह्मादिस्तम्बान्तानां सम्भवो जनिर् भवति ॥ ३ ॥

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ ४ ॥

**श्रीधर**: न केवलं सृष्ट्युपक्रम एव मदधिष्ठानेनाभ्यां प्रकृतिपुरुषाभ्याम् अयं भूतोत्पत्तिप्रकारः । अपि तु सर्वदैवेत्याह सर्वेति । सर्वासु योनिषु मनुष्याद्यासु या मूर्तयः स्थावरजङ्गमात्मिका उत्पद्यन्ते तासां मूर्तीनां महद् ब्रह्म प्रकृतिर् योनिर् मातृस्थानीया ।अहं च बीजप्रदः पिता गर्भाधानकर्ता पिता ॥ ४ ॥

**विश्वनाथ**: न केवलं सृष्ट्युत्पत्तिसमय एव सर्वभूतानां प्रकृतिर् माता अहं पिता अपि तु सर्वदैवेत्याह सर्वासु योनिषु देवाद्यासु स्तम्बपर्यन्तासु या मूर्तयो जङ्गम-स्थावरात्मिका उत्पद्यन्ते तासां मूर्तीनां महद् ब्रह्म प्रकृतिः । योनिर् उत्पत्तिस्थानं माता ।अहं बीजप्रदः गर्भाधानकर्ता पिता ॥ ४ ॥

**बलदेव**: सर्वेति । हे कौन्तेय सर्वयोनिषु देवादिस्थावरान्तासु खनिषु या मूर्तयस्तनवः सम्भवन्ति तासां महद् ब्रह्म प्रधानं योनिर् उत्पत्तिहेतुर् मातेत्यर्थः । जीवप्रदस्तत्कर्मानुगुण्येन परमाणुचैतन्यराशिसंयोजकः परेशोऽहं पिता भवामि ॥ ४ ॥

सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनम् अव्ययम् ॥ ५ ॥

**श्रीधर**: तद् एवं परमेश्वराधीनाभ्यां प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूप्ये-दानीं प्रकृतिसंयोगेन पुरुषस्य संसारं प्रपञ्चयति । सत्त्वम् इत्यादि चतुर्दशभिः । सत्त्वं रजस्तम इत्येवं संज्ञकास्त्रयो गुणाः प्रकृतिसम्भवाः । प्रकृतेः सम्भव उद्भवो येषां ते तथोक्ताः ।गूनसाम्यं प्रकृतिः ।तस्याः सकाशात् पृथक्केआभिव्यक्ताः सन्तः प्रकृतिकार्ये देहे तादात्म्येन स्थितं देहिनं चिदंशं वस्तुतोऽव्ययं निर्विकारम् एव सन्तं निबध्नन्ति स्वकार्यैः सुखदुःखमोहादिभिः संयोजयन्तीत्यर्थः ॥ ५ ॥

**विश्वनाथ**: तद् एव प्रकृतिपुरुषाभ्यां सर्वभूतोत्पत्तिं निरूपेय्दानीं के गुणा उ-च्यन्ते । तेषु सङ्गात् जीवस्य कीदृशो बन्ध इत्यपेक्षायाम् आह सत्त्वम् इति । देहे प्रकृतिकार्ये तादात्म्येन स्थितं देहिनं जीवं वस्तुतोऽव्ययं निर्विकारम् असङ्गिनम् अप्यनाद्यविद्यया कृताद् गुणसङ्गाद् एव हेतोर् गुणा निबध्नन्ति ॥ ५ ॥

**बलदेव**: अथ के गुणाः कथं तेषु पुरुषस्य सङ्गः कथं वा ते तं निबध्नन्ति इत्याह सत्त्वम् इति चतुर्भिः । सत्त्वादिसंज्ञकास्त्रयो गुणाः प्रकृतिसम्भवाः प्रकृ-तेर् अभिव्यक्तास्ते स्वकार्ये देहे स्थितं पुरुषम् अव्ययं वस्तुतो निर्विकारम् अपि निबध्नन्त्यविवेकगृहीतैः सुखदुःखमोहैः स्वधर्मैस्तं योजयन्तीति ॥ ५ ॥

तत्र सत्त्वं निर्मलत्वात् प्रकाशकम् अनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ ६ ॥

**श्रीधर**: तत्र सत्त्वस्य बन्धकत्वप्रकारं चाह तत्रेति । तत्र तेषां गुणानां मध्ये सत्त्वं निर्मलत्वात् स्वच्छत्वात् स्फटिकमणिर् इव प्रकाशकं भास्वरम् अनामयं च निरुपद्रवम् । शान्तम् इत्यर्थः । अतः शान्तत्वात् स्वकार्येण सुखेन यः सङ्गस्तेन बध्नाति । प्रकाशकत्वाच् च स्वकार्येण ज्ञानेन यः सङ्गस्तेन च बध्नाति । हे अनघ निष्पाप, अहं सुखी ज्ञानी चेति मनोधर्मांस्तदभिमानिनि क्षेत्रज्ञे संयोजयतीत्यर्थः ॥ ६ ॥

**विश्वनाथ**: तत्र सत्त्वस्य लक्षणं बन्धकत्वप्रकारं चाह तत्रेति । अनामयं निरुपद्रवं शान्तम् इत्यर्थः । । शान्तत्वात् स्वकार्येण सुखेन यः सङ्गः प्रकाशकत्वात् स्वकार्येण ज्ञानेन च यः सङ्गः अहं सुखी ज्ञानी चेत्युपाधिधर्मयोर् अविद्ययैव जीवस्याभिमानस्तेन तं बध्नाति । हे अनघेति त्वं तु अहं सुखी अहं ज्ञानीत्यभिमानलक्षणम् अघं मा स्वीकुर् इति भावः ॥ ६ ॥

**बलदेव**: अथ सत्त्वादीनां त्रयाणां लक्षणानि बन्धकत्वप्रकारांश्चाह तत्रेति त्रिभिः । तत्र तेषु त्रिषु मध्ये प्रकाशकं ज्ञानव्यञ्जकम् अनामयम् अरोगं दुःखविरोधिसुखव्यञ्जकम् इति यावत् । कुतः । निर्मलत्वात् स्वच्छत्वात् । तथा च प्रकाशसुखकारणं सत्त्वम् इति । तच् च सत्त्वं स्वकार्ये ज्ञाने सुखे च यः संयोगो ज्ञान्यहं सुख्यहम् इत्यभिमानस्तेन पुरुषं निबध्नाति । ज्ञानं चेदं लौकिकवस्तु याथात्म्यविषयं सुखं च देहेन्द्रियप्रसदरूपं बोध्यम् । तत्र तत्र सङ्गे सति तदुपायेषु कर्मसु प्रवृत्तिस्तत्फलानुभवोपायेषु देहेषूत्पत्तिः । पुनश्च तत्र तत्र सङ्ग इति न सत्त्वाद् विमुक्तिः ॥ ६ ॥

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन् निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ ७ ॥

**श्रीधर**: रजसो लक्षणं बन्धकत्वं चाह रज इति । रजःसंज्ञकं गुणं रागात्मकम् अनुरञ्जनरूपं विद्धि । अतएव तृष्णासङ्गसमुद्भवम् । तृष्णाप्राप्तेर्'र्थेऽभिलाषः । सगगः प्राप्तेऽर्थे प्रीतिर् विशेषेणासक्तिः । तयोस्तृष्णासङ्गयोः समुद्भवो यस्मात् तद्रजो देहिनं दृष्टादृष्टार्थेषु कर्मसु सङ्गेनासक्त्या नितरां बध्नाति । तृष्णासङ्गाभ्यां हि कर्मसु आसक्तिर् भवतीत्यर्थः ॥ ७ ॥

**विश्वनाथ**: रजोगुणं रागात्मकम् अनुरञ्जनरूपं विद्धि । तृष्णा अप्राप्तेऽर्थे अभिलाषः । सङ्गः प्राप्तेऽर्थे आसक्तिः । तयोः समुद्भवो यस्मात् तद् रजः देहिनं दृष्टादृष्टार्थेषु कर्मसु सङ्गेनासक्त्या बध्नाति तृष्णासङ्गाभ्यां कर्मस्वासक्तिर् भवति ॥ ७ ॥

**बलदेव**: रज इति रागः स्त्रीपुरुषयोर् मिथोऽभिलासस्तदात्मकं रजोवृद्धि-हेतुकार्ययोस्तादात्म्यात् । तच् च तृष्णादिसमुद्भवं शब्दादिविषयाभिलाषस्तृष्णा । पुत्रमित्रादिसंयोगोऽभिलाषः सङ्गस्तयोः सम्भवो यस्मात् तत् । तथा च रागतृष्णा-सङ्गकारणं रजः इति । तद् रजः स्त्रीविषयपुत्रादिप्रापकेषु कर्मसु सङ्गेनाभिलाषेण देहिनं पुरुषं निबध्नाति । स्त्र्यादिस्पृहया कर्माणि करोति । तानि तत्फलानुभवो-पायभूतान् स्त्र्यादीन् प्रापयन्ति । पुनर् अप्येवम् इति रजसो न विमुक्तिः ॥ ७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन् निबध्नाति भारत ॥ ८ ॥

**श्रीधर**: तमसो लक्षणं बन्धकत्वं चाह तम इति । तमस्त्वज्ञानाज्जातम् आ-वरणशक्तिप्रधानात् प्रकृत्यंशाद् उद्भुतं विद्धीत्यर्थः । अतः सर्वेषां देहिनां मोहनं भ्रान्तिजनकम् । अतएव प्रमादेनालस्येन निद्रया च तत् तमो देहिनं निबध्नाति । तत्र प्रमादोऽनवधानम् । आलस्यम् अनुद्यमः । निद्रा चित्तस्यावसादाल् लयः ॥ ८ ॥

**विश्वनाथ**: अज्ञानम् अज्ञानात् स्वीयफलात् जातं प्रतीतमनुमितं भवतीत्यज्ञा-नजमज्ञानजनकम् इत्यर्थः । मोहनं भ्रान्तिजनकम् । प्रमादोऽनवधानम् । आलस्य-मनुद्यमः । निद्रा चित्तस्यावसादाल् लयः ॥ ८ ॥

**बलदेव**: तमस्त्विति । तुशब्दः पूर्वद्वितीयाद् विशेषद्योतकः । वस्तुयाथा-त्म्यावगमो ज्ञानं तद्विरोध्यावरकताप्रधानं प्रकृत्यंशोऽज्ञानम् । तस्माज्जातं तमोऽतः सर्वदेहिनां मोहनं विपर्ययज्ञानजनकम् । तथा च वस्तुयाथात्म्यज्ञानावरकं विपर्य-यज्ञानजनकं तमः इति । तत् तमः प्रमादादिभिः स्वकार्यैः पुरुषं निबध्नाति । तत्र प्रमादोऽनवधानम् अकार्ये कर्मणि प्रवृत्तिरूपं सत्त्वकार्यप्रकाशविरोधी । आलस्यम् अनुद्यमः, रजःकार्यप्रवृत्तिविरोधि । तदुभयविरोधिनी तु निद्रा चित्तस्यावसादात्मेति ॥ ८ ॥

सत्त्वं सुखे संजयति रजः कर्मणि भारत ।
ज्ञानम् आवृत्य तु तमः प्रमादे संजयत्युत ॥ ९ ॥

**श्रीधर**: सत्त्वादीनाम् एवं स्वस्वकार्यकरणे सामर्थ्यातिशयम् आह सत्त्वम् इति । सत्त्वं सुखे सञ्जयति संश्लेषयति । दुःखशोकादिकारणे सभापि सुखाभिमुखम् एव

देहिनं करोतीइत्यर्थः ।एवं सुखादिकारणे सत्यपि रजः कर्मण्येव सञ्जयति ।तमस्तु महत्सङ्गेन उत्पाद्यमानम् अपि ज्ञानम् आवृत्याअच्छाद्य प्रमादे सञ्जयति ।महद्भिर् उपदिश्यमानस्यार्थस्यानवधाने योजयति उतापि ।आलस्यादावपि संयोजयतीत्यर्थः ॥९ ॥

**विश्वनाथ**: उक्तम् एवार्थं सङ्क्षेपेण पुनर् दर्शयति ।सत्त्वं कर्तृ सुखे स्वीयफले आसक्तं जीवं सञ्जयति वशीकरोति निबध्नातीत्यर्थः । रजः कर्तृ कर्माणि आसक्तं जीवं बध्नाति ।तमः कर्तृ प्रमादेऽभिरतं तं ज्ञानम् आवृत्य अज्ञानम् उत्पाद्येत्यर्थः ॥९ ॥

**बलदेव**: गुणाः स्वान्यद्वयोत्कृष्टाः सन्तः स्वकार्ये तन्वन्तीत्याह सत्त्वम् इति द्वाभ्याम् ।सत्त्वम् उत्कृष्टं सत् स्वकार्ये सुखे पुरुषं सञ्जयत्यासक्तं करोति ।रजो उत्कृष्टं सत् कर्माणि तं सञ्जयति । तम उत्कृष्टं सत् प्रमादे तं सञ्जयति ज्ञानम् आवृत्याच्छाद्याज्ञानम् उत्पाद्येत्यर्थः ॥९ ॥

रजस्तमश्चाभिभूय सत्त्वं भवति भारत
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ ॥

**श्रीधर**: तत्र हेतुम् आह रज इति ।रजस्तमश्चेति गुणद्वयम् अभिभूय तिरस्कृत्य सत्त्वं भवति ।अदृष्टवशाद् उद्भवति ।ततः स्वकार्ये सुखज्ञानादौ सञ्जयतीत्यर्थः ।एवं रजोऽपि सत्त्वं तमश्चेति गुणद्वयम् अभिभूयोद्भवति ।ततः स्वकार्ये तृष्णाकर्मादौ सञ्जयति ।एवं तमोऽपि सत्त्वं रजश्चोभावपि गुणावभिभूयोद्भवति ।ततश्च स्वकार्ये प्रमादालस्यादौ सञ्जयतीत्यर्थः ॥१० ॥

**विश्वनाथ**: उक्तं स्वस्वकार्यं सुखादिकं प्रति गुणाः कथं प्रभवन्तीत्यपेक्षायाम् आह रजस्तमश्चेति गुणद्वयम् अभिभूय तिरस्कृत्य सत्त्वं भवति अदृष्टवशाद् उद्भवति ।एवं रजोऽपि सत्त्वं तमश्चेति गुणद्वयाभिभूय तादृशादृष्टवशाद् उद्भवति ।तमोऽपि सत्त्वं रजश्चोभावपि गुणावभिभूयोद्भवति ॥१० ॥

**बलदेव**: समेषु त्रिषु कथम् अकस्माद् एकस्योत्कर्ष इति चेत् प्राचीनतादृशकर्मोदयात् तादृशाहाराच् च स्वभवतीति भववान् आह रज इति । सत्त्वं कर्तृ रजस्तमश्चाभिभूयो तिरस्कृत्योत्कृष्टं भवति । रजः कर्तृ सत्त्वं तमश्चाभिभूयोत्कृष्टं भवति । तमः कर्तृ सत्त्वं रजश्चाभिभूयोत्कृष्टं भवति । यदोत्कृष्टं भवति, तदा पूर्वोक्तम् असाधारणं कार्यं करोतीति शेषः ॥१० ॥

सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वम् इत्युत ॥११ ॥

**श्रीधर**: इदानीं सत्त्वादीनां विवृद्धानां लिङ्गान्याह सर्वद्वारेष्विति त्रिभिः ।अस्मिन्न् आत्मनो भोगायतने देहे सर्वेष्वपि द्वारेषु श्रोत्रादिषु यदा शब्दादिज्ञानात्मकः प्रकाश उपजायते उत्पद्यते तदानेन प्रकाशलिङ्गेन सत्त्वं विवृद्धं विद्याज्जानीयात् । उत शब्दात् सुखादिलिङ्गेनापि जानीयाद् इत्युक्तम् ॥ ११ ॥

**विश्वनाथ**: वर्धमानो गुण एव स्वापेक्षया क्षीणावितरौ गुणावभिवातीत्युक्तम् । अतस्तेषां वृद्धिलिङ्गान्याह सर्वेति त्रिभिः ।सर्वद्वारेषु श्रोत्रादिषु यदा प्रकाशः स्यात् । कीदृशः । ज्ञानं वैदिकशब्दादियथार्थज्ञानात्मकं तदा तादृशज्ञानलिङ्गेनैव सत्त्वं विवृद्धम् इति जानीयात् ।उत्शब्दाद् आत्मोत्थसुखाट्त्मकः प्रकाशश्च यदेति ॥ ११ ॥

**बलदेव**: उत्कृष्टानां सत्त्वादीनां लिङ्गान्याह सर्वेति त्रिभिः । यदा सर्वेषु ज्ञानद्वारेषु श्रोत्रादिषु शब्दादियाथात्म्यप्रकाशरूपं ज्ञानम् उपजायते । तदा तादृशज्ञानलिङ्गेनास्मिन् देहे सत्त्वं विवृद्धं विद्यात् । उतेत्यप्यर्थे । सुखलिङ्गेनापि तद् विद्याद् इत्यर्थः ॥ ११ ॥

लोभः प्रवृत्तिरारम्भः कर्मणाम् अशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥ १२ ॥

**श्रीधर**: किं च लोभ इति । लोभो धनाद्यागमे जायमानेऽपि पुनः पुनर् वर्धमानोऽभिलाषः । प्रवृत्तिर् नित्यं कुर्वद्रूपता ।कर्मणाम् आरम्भो महागृहादिनिर्माणोद्यमः । अशम इदं कृत्वा इदं करिष्यामि इत्यादि सङ्कल्पविकल्पानुपरमः ।स्पृहा उच्चावचेषु दृष्टमात्रेषु वस्तुषु इतस्ततो जिघृक्षा ।रजसि विवृद्धे सत्येतानि लिङ्गानि जायन्ते ।एतैस्तमसो विवृद्धिर् जाआनीयाद् इत्यर्थः ॥ १२ ॥

**विश्वनाथ**: प्रवृत्तिर् नाना प्रयत्नपरता कर्मणाम् आरम्भो गृहादिनिर्माणोद्यमः ।अशमो विषयभोगानुपरतिः ॥ १२ ॥

**बलदेव**: लोभः स्वद्रव्यात्यागपरता ।प्रवृत्तिस्तद्वृद्धियत्नापरता ।कर्मणां गृहनिर्माणादीनाम् आरम्भः । अशमो विषयभोगाद् इन्द्रियाणाम् अनुपरतिः ।स्पृहा विषयलिप्सा ।एतैर् लिङ्गै रजो विवृद्धं विद्यात् ॥ १२ ॥

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥ १३ ॥

**श्रीधर**: किं च अप्रकाश इति ।अप्रकाशो विवेकभ्रंशः ।अप्रवृत्तिर् अनुद्यमः ।प्रमादः कर्तव्यार्थानुसन्धानराहित्यम् ।मोहो मिथ्याभिनिवेशः ।तमसि विवृद्धे सत्येतानि लिङ्गानि जायन्ते ।एतैस्तमसो विवृद्धिं जानीयाद् इत्यर्थः ॥१३ ॥

**विश्वनाथ**: अप्रकाशो विवेकाभावः ।शास्त्राविहितशब्दादिग्रहणम् ।अप्रवृत्तिः प्रयत्नमात्रराहित्यम् ।प्रमादः कण्ठादिधृतेऽपि वस्तुनि नास्तीति प्रत्ययः ।मोहो मिथ्याभिनिवेशः ॥१३ ॥

**बलदेव**: अप्रकाशो ज्ञानाभावः ।शास्त्राविहितविषयग्रहरूपोऽप्रवृत्तिः क्रियाविमुखता ।प्रमादः करादिस्थेऽप्यर्थे नास्तीति प्रत्ययो मोहो मिथ्याभिनिवेशः ।एतैर् लिङ्गैस्तमो विवृधं विद्यात् ॥१३ ॥

> यदा सत्त्वे प्रवृद्धे तु प्रलयं याति देहभृत् ।
> तदोत्तमविदां लोकान् अमलान् प्रतिपद्यते ॥१४ ॥

**श्रीधर**: मरणसमय एव विवृद्धानां सत्त्वादीनां फलविशेषम् आह यदेति द्वाभ्याम् ।सत्त्व प्रवृद्धे सति यदा जीवो मृत्युं प्राप्नोति तदा उत्तमान् हिरण्यगर्भादीन् विदन्ति उपासत इत्युत्तमविदः तेषां ये अमलाः प्रकाशमया लोकाः सुखोपभोगस्थानविशेषास्तान् प्रतिपद्यते प्राप्नोति ॥१४ ॥

**विश्वनाथ**: प्रलयं याति मृत्युं प्राप्नोति ।तदा उत्तमं विन्दन्ति लभन्त इत्युत्तमविदो हिरण्यगर्भाद्युपासकास्तेषां लोकान् अमलान् सुखप्रदान् ॥१४ ॥

**बलदेव**: मृतिकाले विवृद्धानां गुणानां फलविशेषान् आह यद् एति द्वाभ्याम् ।सत्त्वे प्रवृद्धे सति यदा देहभृज्जीवः प्रलयं याति म्रियते, तदोत्तमविदां हिरण्यगर्भाद्युपासकानां लोकान् दिव्यभोगोपेतान् प्रतिपद्यते लभते ।अमलान् रजस्तमोमलहीनान् ॥१४ ॥

> रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते ।
> तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१५ ॥

**श्रीधर**: किं च रजसीति ।रजसि प्रवृद्धे सति मृत्युं प्राप्य कर्मासक्तेषु मनुष्येषु जायते ।तथा तमसि प्रवृद्धे सति प्रलीनो मृतो मूढयोनिषु जायते ॥१५ ॥

**विश्वनाथ**: कर्मसङ्गिषु कर्मासक्तमनुष्येषु ॥१५ ॥

**बलदेव**: रजसि प्रवृद्धे प्रलयं मरणं गत्वा जनः कर्मसङ्गिषु काम्यकर्मासक्तेषु नृषु मध्ये जायते ।तथा तमसि प्रवृद्धे प्रलीनो मृतो जनो मूढयोनिषु पश्वादिषु ॥१५ ॥

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखम् अज्ञानं तमसः फलम् ॥ १६ ॥

**श्रीधर**: इदानीं सत्त्वादीनां स्वानुरूप कर्मद्वारेण विचित्रफलहेतुत्वम् आह कर्मण इति । सुकृतस्य सात्त्विकस्य कर्मणः सात्त्विकं सत्त्वप्रधानं निर्मलं प्रकाशबहुलं सुखं फलम् आहुः कपिलादयः । रजस इति राजसस्य कर्मण इत्यर्थः । कर्मफलकथनस्य प्रकृतत्वात् । तस्य दुःखं फलम् आहुः । तमस इति तामसस्य कर्मण इत्यर्थः । तस्याज्ञानं मूढत्वं फलम् आहुः । सात्त्विकादिकर्मलक्षणं च नियतं सङ्गरहितम् इत्यादिना अष्टादशेऽध्याये वक्ष्यति ॥ १६ ॥

**विश्वनाथ**: सुकृतस्य सात्त्विकस्य कर्मणः सात्त्विकम् एव निर्मलं निरुपद्रवम् । अज्ञानम् अचेतनता ॥ १६ ॥

**बलदेव**: अथ गुणानां स्वानुरूपकर्मद्वारा विचित्रफलह्जेतुत्वम् आह कर्मण इति । सुकृतस्य सात्त्विकस्य कर्मणो निर्मलं फलम् आहुर् गुणस्वभावविदो मुनयो मलदुःखमोहरूपरजस्तमःफललक्षणान् निर्गतं सुखम् इत्यर्थः । तच् च सात्त्विकं सत्त्वेन निर्वृत्तम् । रजसो राजसस्य कर्मणः फलं दुःखं कार्यस्य कारणानुरूप्याद् दुःखप्रचुरं किञ्चित् सुखम् इत्यर्थः । तमस्तामसस्य कर्मणो हिंसादेः फलम् अज्ञान-चैतन्यप्रायं दुःखम् एवेत्यर्थः । तत्र रजस्तमह्शब्दाभ्यां राजसतामसकर्मणी लक्ष्ये गोभिः प्रीणितमत्सरम् इत्यत्र यथा गोशब्देन गोपयो लक्ष्यते । सात्त्विकादिकर्मणां लक्षणान्यष्टादशे वक्ष्यन्ते नियतं सङ्गरहितम् इत्यादिभिः ॥ १६ ॥

सत्त्वात् संजायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानम् एव च ॥ १७ ॥

**श्रीधर**: तत्रैव हेतुम् आह सत्त्वाद् इति । सत्त्वाज्ज्ञानं सञ्जायते । अतः सात्त्विकस्य कर्मणः प्रकाशबहुलं सुखं फलं भवति । रजसो लोभो जायते । तस्य च दुःखहेतुत्वात् तत्पूर्वकस्य कर्मणो दुःखं फलं भवति । तमसस्तु प्रमादमोहाज्ञानानि भवन्ति । ततस्तामसस्य कर्मणोऽज्ञानप्रापकं फलं भवतीति युक्तम् एवेत्यर्थः ॥ १७ ॥

**बलदेव**: ईदृक्फलवैचित्र्ये प्राग् उक्तम् एव हेतुम् आह सत्त्वाद् इति । सत्त्वात् प्रकाशलक्षणं ज्ञानं जायते । अतः सात्त्विकस्य कर्मणः प्रकाशप्रचुरं सुखं फलम् । रजसो लोभस्तृष्णाविशेषो यो विषयकोटिभिर् अप्यभिसेवितैर् दुष्पूरस्तस्य च दुःख-हेतुत्वात् तत्पूर्वकस्य कर्मणो दुःखप्रचुरं किञ्चित् सुखं फलम् । तमसस्तु प्रमादादीनि भवन्त्यतस्तत्पूर्वकस्य कर्मणोऽचैतन्यप्रचुरं दुःखम् एव फलम् ॥ १७ ॥

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥ १८ ॥

**श्रीधर**: इदानीं सत्त्वादिवृत्तिशीलानां फलभेदम् आह ऊर्ध्वम् इति । सत्त्वस्थाः सत्त्ववृत्तिप्रधानाः । ऊर्ध्वं गच्छन्ति सत्त्वोत्कर्षतारतम्याद् उत्तरोत्तरणतगुणानन्दान् मनुष्यगन्धर्वपितृदेवादिलोकान् सत्यलोकपर्यन्तान् प्राप्नुवन्तीत्यर्थः । राजसास्तु तृष्णाद्याकुला मध्ये तिष्ठन्ति । मनुष्यलोक एव उत्पद्यन्ते । जघन्यो निकृष्टस्तमोगुणः । तस्य वृत्तिः प्रमादमोहादिः । अत्र स्थिता अधोगच्छन्ति । तमसो वृत्तितारतम्यात् तामिस्रादिषु निरयेषु उत्पद्यन्ते ॥ १८ ॥

**विश्वनाथ**: सत्त्वस्थाः सत्त्वतारतम्येनोर्ध्वं सत्यलोकपर्यन्तम् । मध्ये मनुस्यलोक एव । जघन्यश्चासौ गुणश्चेति तस्य वृत्तिः प्रमादालस्यादिस्तत्र स्थिता अधो गच्छन्ति नरकं यान्ति ॥ १८ ॥

**बलदेव**: अथ सत्त्वादिवृत्तिनिष्ठानां तान्येव फलान्यूर्ध्वमध्याधोभावेनाह ऊर्ध्वम् इति । तमसि वृत्तिशब्दाद् इतरयोश्च वृत्तिर् विवक्षिता । सत्त्वस्थाः सत्त्ववृत्तिनिष्ठाः सत्त्वतारतम्येनोर्ध्वं सत्यलोकपर्यन्तं गच्छन्ति । राजसा रजोवृत्तिनिष्ठा मध्ये पुण्यपापमिश्रिते मनुष्यलोके तिष्ठन्ति । मनुष्या एव भवन्ति रजस्तारतम्येन । जघन्यः सत्त्वरजोऽपेक्षया निकृष्टो यो गुणस्तमःसंज्ञस्तद्वृत्तौ प्रमादादौ स्थितास्त्वधो गच्छन्ति तमस्तारतम्येन पशुपक्षिस्थावरादियोनिं लभन्ते । तामसा इत्युक्तिस्तेषां सर्वदा तमसि स्थितिं व्यनक्ति ॥ १८ ॥

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥

**श्रीधर**: तद् एवं प्रकृतिगुणसङ्गकृतं संसारप्रपञ्चम् उक्त्वा इदानीं तद्विवेकतो मोक्षं दर्शयति नान्यम् इति । यदा तु द्रष्टा विवेकी भूत्वा बुद्ध्याद्याकारपरिणतेभ्यो गुणेभ्योऽन्यं कर्तारं नानुपश्यति । अपि तु गुण एव कर्माणि कुर्वन्तीति पश्यति । गुणेभ्यश्च परं व्यतिरिक्तं तत्साक्षिणम् आत्मानं वेत्ति । स तु मद्भावं ब्रह्मत्वम् अधिगच्छति प्राप्नोति ॥ १९ ॥

**विश्वनाथ**: गुणकृतं संसारं दर्शयित्वा गुणातीतं मोक्षं दर्शयति नान्यम् इति द्वाभ्याम् । गुणेभ्यः कर्तृकरण्विषयाकारेण परिणतेभ्योऽन्यं कर्तारं द्रष्टा जीवो यदा नानुपश्यति, किन्तु गुणा एव सदैव कर्तार इत्येवम् अनुपश्यति अनुभवतीत्यर्थः । गुणेभ्यः परं व्यतिरिकम् एवात्मानं वेत्ति तदा स द्रष्टा मद्भावं मयि सायुज्यम्

अधिगच्छति प्राप्नोति । तत्र तादृशज्ञानानन्तरम् अपि मयि परां भक्तिं कृत्वैव इत्युपान्तश्लोकार्थदृष्ट्या ज्ञेयम् ॥ १९ ॥

**बलदेव**: एवं गुणविवेकात् संसारम् उक्त्वा तद्विवेकान् मोक्षम् आह नान्यम् इति द्वाभ्याम् । द्रष्टा तत्त्वयाथात्म्यदर्शी जीवो यदा देहेन्द्रियात्मना परिणतेभ्यो गुणेभ्योऽन्यं कर्तारं नानुपश्यति गुणान् कर्तॄईन् पश्यत्यात्मानं गुणेभ्यः परमकर्तारं वेत्ति । तदा स मद्भावम् अधिगच्छति । अयम् आशयः न खलु विज्ञानानन्दो विशुद्धो जीवो युद्धयज्ञादिदुःखमयकर्मणां कर्ता, किन्तु गुणमयदेहेन्द्रियवान् एव संस्तथेति गुणहेतुकत्वाद् गुणनिष्ठं तत्कर्मकर्तृत्वं न तु विशुद्धात्मनिष्ठम् इति यदानुपश्यति, तदा मद्भावम् असंसारित्वं मत्परभक्तिं वा । लभत इति पुराप्येतद् अभाषि । इह गुणहेतुकं कर्तृत्वं शुद्धस्य निषिद्धं, न तु शुद्धनिष्ठम् इति । तस्य द्रष्टा इत्यादिनोक्तम् ॥ १९ ॥

गुणान् एतान् अतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतम् अश्नुते ॥ २० ॥

**श्रीधर**: ततश्च गुणकृतसर्वानर्थनिवृत्त्या कृतार्थो भवतीत्याह गुणान् इति । देहाद्याकारः समुद्भवः परिणामो येषां ते देहसमुद्भवाः । तान् एतां त्रीन् अपि गुणान् अतीत्यातिक्रम्य तत्कृतैर् जन्मादिभिर् विमुक्तः सन्न् अमृतम् अश्नुते परमानन्दं प्राप्नोति ॥ २० ॥

**विश्वनाथ**: ततश्च सोऽपि गुणातीत एवोच्यत इत्याह गुणान् इति ॥ २० ॥

**बलदेव**: मद्भावपदेनोक्तम् अर्थं स्फुटयति गुणान् इति । देही देहमध्यस्थोऽपि जीवो गुणपुरुषविवेकबलेनैतान् देहसमुद्भवान् देहोत्पादाअंस्त्रीन् गुणान् अतीत्योल्लङ्घ्य जन्मादिभिर् विमुक्तोऽमृतम् आत्मानम् अश्नुतेऽनुभवति । सोऽयम् असंसारित्वलक्षणो मद्भावो मत्परभक्तिपात्रतालक्षणो वा । एवं वक्ष्यति ब्रह्मभूतः प्रसन्नात्मा इत्यादि ॥ २० ॥

अर्जुन उवाच
कैर्लिङ्गैस्त्रीन् गुणान् एतान् अतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन् गुणान् अतिवर्तते ॥ २१ ॥

**श्रीधर**: गुणान् एतान् अतीत्यामृतम् अश्नुत इत्येतत् श्रुत्वा गुणातीतस्य लक्षणम् आचारं गुणात्ययोपारं च सम्यग् बुभुत्सुर् अर्जुन उवाच कैर् इति । हे

प्रभो कैर् लिङ्गैः कीदृशैर् आत्मव्युत्पन्नैश्चिह्नैर् गुणातीतो देही भवतीति लक्षणप्रश्नः । क आचारोऽस्य इति किम् आचारः । कथं वर्तत इत्यर्थः । कथं च केनोपायेन एतांस्त्रीन् अपि गुणान् अतीत्य वर्तते । तत् कथयेत्यर्थः ॥ २१ ॥

**विश्वनाथ**: स्थितप्रज्ञस्य का भाषा इत्यादिना द्वितीयाध्याये पृष्टम् अप्यर्थं पुनस्ततोऽपि विशेषबुभूत्सया पृच्छति कैर् लिङ्गैः इत्येकः प्रश्नः । कैश्चिह्नैस्त्रिगुणातीतः स ज्ञेय इत्यर्थः । किम् आचार इति द्वितीयः । कथं चैतान् इति तृतीयः । गुणातीतत्वप्राप्तेः किं साधनम् इत्यर्थः । स्थितप्रज्ञस्य का भाषा इत्यादौ स्थितप्रज्ञो गुणातीतः कथं स्याद् इति तदानीं न पृष्टम् इदानीं तु पृष्टम् इति विशेषः ॥ २१ ॥

**बलदेव**: गुणातीतस्य लक्षणम् आचारं च गुणात्ययसाधनं चार्जुनः पृच्छति कैर् इत्यर्धकेन । प्रथमः प्रश्नः कैश्चिह्नैर् गुणातीतो ज्ञातुं शक्य इत्यर्थः । किम् आचार इति द्वितीयः स किं यथेष्टाचारो नियताचारो वेत्यर्थः । कथं चैतान् इति तृतीयः केन साधनेन गुणान् अत्येतीत्यर्थः ॥ २१ ॥

**श्रीभगवान् उवाच**
**प्रकाशं च प्रवृत्तिं च मोहम् एव च पाण्डव ।**
**न द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ २२ ॥**

**श्रीधर**: स्थितप्रज्ञस्य का भाषा इत्यादिना द्वितीयेऽध्याये पृष्टम् अपि दत्तोत्तरम् अपि पुनर् विशेषबुभूत्सया पृच्छतीति ज्ञात्वा प्रकारान्तरेण् तस्य लक्षणादिकं श्रीभगवान् उवाच प्रकाशं चेत्यादि षड्भिः । तत्रैकेन लक्षणम् आह प्रकाशम् इति । प्रकाशं च सर्वद्वारेषु देहेऽस्मिन्न् इति पूर्वोक्तं सत्त्वकार्यम् । प्रवृत्तिं च रजःकार्यम् । मोहं च तमःकार्यम् । उपलक्षणम् एतत् सत्त्वादीनाम् । सर्वाण्यपि यथायथं सम्प्रवृत्तानि स्वतःप्राप्तानि सन्ति दुःखबुद्ध्या यो न द्वेष्टि । निवृत्तानि च सन्ति सुखबुद्ध्या यो न काङ्क्षति, गुणातीतः स उच्यते इति चतुर्थेनान्वयः ॥ २२ ॥

**विश्वनाथ**: तत्र कैर् लिङ्गैर् गुणातीतो भवतीति प्रथमप्रश्नस्योत्तरम् आह प्रकाशं च सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते इति सत्त्वकार्यम् । प्रवृत्तिं च रजःकार्यम् । मोहं च तमःकार्यम् । उपलक्षणम् एतत् सत्त्वादीनाम् । सर्वाण्यपि यथायथं सम्प्रवृत्तानि स्वतःप्राप्तानि दुःखबुद्ध्या यो न द्वेष्टि । गुणकार्याण्येतानि निवृत्तानि च सुखबुद्ध्या यो न काङ्क्षति, स गुणातीत उच्यते इति चतुर्थेनान्वयः । सम्प्रवृत्तानीति क्लीबन्तम् आर्षम् ॥ २२ ॥

**बलदेव**: यद्यपि स्थितप्रज्ञस्य का भाषा इत्यादिना पृष्टम् इदं प्रजहाति यदा कामान् इत्यादिनोत्तरितं च, तथापि विशेषजिज्ञासया पृच्छतीति विधान्तरेण तस्य

लक्षाणादीन्याह भगवान् प्रकाशं चेत्यादि पञ्चभिः । तत्रैकेन लक्षणं स्वसंवेद्यम् आह प्रकाशं सत्त्वकार्यं प्रवृत्तिं रजःकार्यं मोहं तमःकार्यं एतानि त्रीणि सम्प्रवृत्तान्युत्पादकसामग्रीवशात् प्राप्तानि दुःखरूपाण्यपि दुःखबुद्ध्या यो न द्वेष्टि, विनाशकसामग्रीवशान् निवृत्तानि विनष्टानि तानि सुखरूपान्यपि सुखबुद्ध्या यो नाकाङ्क्षति, एतादृशद्वेषरागशून्यो गुणातीतः स उच्यते इति चतुर्थेनान्वयः । स्वगतौ द्वेषतदभावौ रागतदभावौ च परो न वेदितुम् अर्हतीति स्वसंवेद्यम् इदं लक्षणम् ॥ २२ ॥

**उदासीनवदासीनो गुणैर्यो न विचाल्यते ।**
**गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥ २३ ॥**

**श्रीधरः** तद् एवं स्वसंवेद्यं गुणातीतस्य लक्षणम् उक्त्वा परसंवेद्यं तस्य लक्षणं वक्तुं द्वितीयप्रश्नस्य किम् आचार इत्यस्योत्तरम् आह उदासीनवद् इति त्रिभिः । उदासीनवत् साक्षितयासीनः स्थितः सन् गुणैर् गुणकार्यैः सुखदुःखादिभिर् न यो विचाल्यते स्वरूपान् न प्रच्यवते अपि तु गुणा एव स्वकार्येषु वर्तन्ते । एतैर् मम सम्बन्ध एव नास्तीति विवेकज्ञानेन यस्तुष्णीम् अवतिष्ठति । परस्मैपदम् आर्षम् । नेङ्गते न चलति ॥ २३ ॥

**विश्वनाथः** किम् आचारः इति द्वितीयप्रश्नस्योत्तरम् आह उदासीनवद् इति त्रिभिः । गुणकार्यैः सुखदुःखादिभिर् यो न विचाल्यते स्वरूपावस्थान् न च्यवते, अपि तु गुण एव स्वस्वकार्येषु वर्तन्त इत्येवेति एभिर् मम सम्बन्ध एव नास्तीति विवेकज्ञानेन यस्तूष्णीम् अवतिष्ठति परस्मैपदम् आर्षम् । नेङ्गते न क्वापि दैहिककृत्ये यतते । गुणातीतः स उच्यते इति गुणातीतस्य एतानि चिह्नानि एतान् आचारांश्च दृष्ट्वैव गुणातीतो वक्तव्यो न तु गुणातीतत्वोपपत्तिवावदूको गुणातीतो वक्तव्य इति भावः ॥ २३-२५ ॥

**बलदेवः** अथ परसंवेद्यलक्षणं वक्तुं किम् आचारः इति द्वितीयप्रश्नस्योत्तरम् आह उदासीनेति त्रिभिः । उदासीनो मध्यस्थो यथा विवादिनोः पक्षग्रहैः स्वमाध्यस्थ्यान् न विचाल्यते, तया सुखदुःखादिभावेन पर्णतैर् गुणैर् यो नात्मावस्थितैर् विचाल्यते, किन्तु गुणाः स्वकार्येषु प्रकाशादिषु वर्तन्ते । मम तैर् न सम्बन्ध इति निश्चित्य तूष्णीम् अवतिष्ठते । नेङ्गते गुणकार्यानुरूपेण न चेष्टते । गुणातीतः स उच्यते इति तृतीयेनान्वयः ॥ २३ ॥

**समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।**
**तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥ २४ ॥**

**श्रीधर**: अपि च समेति । समे सुखदुःखे यस्य । यतः स्वस्थः स्वरूप एव स्थितः । अतएव समानि लोष्टाश्मकाञ्चनानि यस्य । तुल्ये पियाप्रिये सुखदुःख-हेतुभूते यस्य । धीरो धीमान् । तुल्यो निन्दा चात्मनः संस्तुतिश्च यस्य ॥ २४ ॥

**बलदेव**: किं च समेति । यतोऽयं स्वस्थः स्वरूपनिष्ठोऽतएव समदुःखसुखःङ् समे अनात्मधर्मत्वात् तुल्ये सुखदुःखे यस्य सः । समान्यनुपादेयतया तुल्यानि लोस्ट्रादीनि यस्य सः । लोष्ट्रमृत्पिण्डतुल्ये प्रियाप्रिये सुखदुःखसाधने वस्तुनी यस्य सः । धीरः प्रकृतिपुरुषविवेककुशलः । तुल्ये निन्दात्मसंस्तुती यस्य सः । तत्प्रयो-जकयोर् दोषगुणयोर् आत्मगतत्वाभावाद् इत्यर्थः । य ईदृशो गुणतीतः स उच्यत इति द्वितीयेनान्वयः ॥ २४ ॥

**मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।**
**सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ २५ ॥**

**श्रीधर**: अपि च मानेति । मानेऽपमाने च तुल्यः । मित्रपक्षेऽरिपक्षे च तुल्यः । सर्वान् दृष्टादृष्टार्थान् आरम्भान् उद्यमान् परित्यक्तुं शीलं यस्य सः । एवम्भूताचारयुक्तो गुणातीत उच्यते ॥ २५ ॥

**बलदेव**: मानेति स्फुटार्थः । निन्दास्तुती वाग्व्यापारेण साध्ये । मानापमानौ तु कायमनोव्यापारेणापि स्याताम् इति भेदः । सर्वेति देहयात्रामात्राद् अन्यत् सर्व-कर्म ग्राह्यम् । य ईदृशो गुणातीतः उन्दासीनवत् इत्याद्युक्ता यस्याचारः परैर् अपि संवेद्याः स गुणातीतो बोध्यो न तु तदुपपत्तिवावदूक इति भावः ॥ २५ ॥

**मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।**
**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ २६ ॥**

**श्रीधर**: कथं चैतान् त्रीन् गुणान् अतिवर्तते इति । अस्य प्रश्नस्योत्तरम् आह मां चेति । चशब्दोऽवधारणार्थः । माम् एव परमेश्वरम् अव्यभिचारेण एकान्तेन भक्तियोगेन यः सेवते स एतान् गुणान् समतीत्य सम्यग् अतिक्रम्य ब्रह्मभूयाय ब्रह्मभावाय मोक्षाय कल्पते समर्थो भवति ॥ २६ ॥

**विश्वनाथ**: कथं चैतान् त्रीन् गुणान् अतिवर्तते इति तृतीयप्रश्नस्योत्तरम् आह मां चेति । च एवार्थे । माम् एव श्यामसुन्दराकारं परमेश्वरं भक्तियोगेन यः सेवते स एव ब्रह्मभूयाय ब्रह्मत्वाय ब्रह्मानुभवाय यावत् भक्त्याहम् एकया ग्राह्यः इति मद्वाक्ये

एकयेति विशेषणोपन्यासात् माम् एव ये प्रपद्यन्ते मायाम् एतां तरन्ति ते इत्यत्रापि एवकारप्रयोगात् भक्त्या विना प्रकारान्तरेण ब्रह्मानुभवो न भवतीति निश्चयात् । भक्तियोगेन कीदृशेन । अव्यभिचारेण कर्मज्ञानाद्यमिश्रेण निष्कामकर्मणो न्यासश्रवणात् । ज्ञानं च मयि सन्न्यसेत् इति ज्ञानिनां चरमदशायां ज्ञानस्यापि न्यासश्रवणात् । भक्तियोगस्य तु क्वापि न्यासाश्रवणात् भक्तियोग एव सोऽव्यभिचारः । तेन कर्मयोगम् इव ज्ञानयोगम् अपि परित्याज्य यद्यव्यभिचारेण केवलेनैव भक्तियोगेन सेवते, तर्हि ज्ञानी अपि गुणातीतो भवति, नान्यथा । अनन्यभक्तस्तु निर्गुणो मदपाश्रयः इत्येकादशोक्तेर् गुणातीतो भवत्येव । अत्र इदं तत्त्वं वैकृषै इत्यत्रासङ्गिनः कर्मिणो ज्ञानिनो वा सात्त्विकत्वेनैव साधकत्वावगतेस्तत्साहचर्यात् निर्गुणो मदपाश्रयः इति भक्तः साधक एवावगम्यते । ततश्च ज्ञानी ज्ञानसिद्धः सन्न् एव सात्त्विकत्वं परित्यज्य गुणातीतो भवति । भक्तस्तु साधकदशाम् आरभ्यैव गुणातीतो भवतीत्यर्थो लभ्यते ।

अत्र चकारोऽवधारणार्थः इति स्वामिचरणाः । माम् एवेश्वरं नारायणम् अव्यभिचारेण भक्तियोगेन द्वादशाद्यायोक्तेन यः सेवत इति मधुसूदनसरस्वतीपादाश्च व्याचक्षते ॥ २६ ॥

**बलदेव**: कथं चैतांस्त्रीन् गुणान् अतिवर्तत इति तृतीयप्रश्नस्योत्तरम् आह मां चेति । चोऽवधारणे । नान्यं गुणेभ्यः करारम् इत्याद्युक्त्या यो गुणपुरुषविवेकख्यातिम् अवाप तयैव तस्या गुणात्ययो न संसिध्यति, किन्तु तद्वान् अपि यो मां कृष्णम् एव मायागुणास्पृष्टं मायानियन्तारं नायायणादिरूपेण बहुधाविर्भूतं चिदानन्दघनं सार्वज्ञ्यादिगुणरत्नालयम् अव्यभिचारेणैकान्तिकेन भक्तियोगेन सेवते श्रयति स एतान् दुरत्ययान् अपि गुणान् अतीत्याक्रम्य ब्रह्मभूयाय कल्पते गुणाष्टविशिष्टत्वाय१ निजधर्माय योग्यो भवति । तं धर्मं लभत इत्यर्थः । जीवे ब्रह्मशब्दस्तूक्त एव प्रक्, तथा च भक्तिशिरस्कयैव तद्विवेकख्यात्या जीवस्य स्वरूपलाभो, न तु केवलया तयेत्युक्तम् । यत् तु ब्रह्मभूयाय इत्यनेन मद्रूपतां स यातीति पार्थसारथिनोपदिष्टम् इति व्याचष्टे । तन्निरवधानम् एव तेनैवेदं ज्ञानम् इत्यादिना मोक्षेऽपि । स्वरूपभेदस्याभिहितत्वात् निरञ्जनः परमं साम्यम् उपैति इत्यादि श्रुतिष्वपि तत्र तस्य दृष्टत्वाद् अणुत्वविभुत्वादिनित्यधर्मकृतत्वेन नित्यत्वाच् च तद्भेदस्य तस्माद् गुणाष्टकविशिष्टत्वम् एव ब्रहैव सन् ब्रह्माप्येति इति श्रुत्यौ तु ब्रह्मसदृशः सन् ब्रमाप्येति प्राप्नोतीत्यर्थः । एवौपम्येऽवधारणे इति विश्वप्रकाशात् । ववा यथा तथैवेवं साम्ये इत्यमरकोषाच् च । अन्य्तहा ब्रह्मभावोत्तरो ब्रह्माप्ययो न सङ्गच्छेत । ॥ २६ ॥

**ब्रह्मणो हि प्रतिष्ठाहम् अमृतस्याव्ययस्य च ।**
**शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ २७ ॥**

**श्रीधरः** तत्र हेतुम् आह ब्रह्मणो हीति ।हि यस्माद् ब्रह्मणोऽहं प्रतिष्ठा प्रतिमा ।घनीभूतं ब्रह्मैवाहम् । यथा घनीभूतः प्रकाश एव सूर्यमण्डलं तद्वद् इत्यर्थः । तथाव्ययस्य नित्यस्य ।अमृतस्य मोक्षस्य च नित्यमुक्तत्वात् ।तथा तत्साधनस्य शाश्वतस्य धर्मस्य च शिद्दजसत्त्वात्मकत्वात् ।तथैकान्तिकस्य अखण्डितस्य सुखस्य च प्रतिष्ठाहम् ।परमानन्दैकरूपत्वात् ।अतो मत्सेविनो मद्भावस्यावश्यम्भावित्वाद् युक्तम् एवोक्तं ब्रह्मभूयाय कल्पत इति ॥

कृष्णाधीनगुणासङ्गप्रसञ्जितभवाम्बुधिम् ।
सुखं तरति मद्भक्त इत्यभाषि चतुर्दशे ॥

इति श्रीश्रीधरस्वामिकृतायां भगवद्गीताटीकायां सुबोधिन्यां गुणत्रयविभागयोगो नाम चतुर्दशोऽध्यायः ॥१४ ॥

**विश्वनाथः** ननु मद्भक्तानां कथं निर्गुणब्रह्मत्वप्राप्तिः । सा तु अद्वितीयतदेकानुभवेनैव सम्भवेत् तत्राह ब्रह्मणो हीति । यस्मात् परमप्रतिष्ठात्वेन प्रसिद्धं यद् ब्रह्म तस्याप्यहं प्रतिष्ठा प्रतिष्ठीयतेऽस्मिन्न् इति प्रतिष्ठा आश्रयोऽस्न्नमयादिषु श्रुतिषु सर्वत्रैव प्रतिष्ठापदस्य तथार्थत्वात् । तथामृतस्य प्रतिष्ठा किं स्वर्गीयसुधायाः, न ।अव्ययस्य नाशरहितस्य मोक्षस्येत्यर्थः । तथा शाश्वतस्य धर्मस्य साधनफलदशयोर् अपि नित्यस्थितस्य भक्त्याख्यस्य परमधर्मस्याहं प्रतिष्ठा, तथा तत्प्राप्यस्यैकान्तिकभक्तसम्बन्धिनः सुखस्य प्रेम्णश्चाहं प्रतिष्ठा ।अतः सर्वस्यापि मदधीनत्वात् कैवल्यकामनया कृतेन मद्भजनेन ब्रह्मणि लीयमानो ब्रह्मत्वम् अपि प्राप्नोति ।

अत्र ब्रह्मणोऽहं प्रतिष्ठा घनीभूतं ब्रह्मैवाहं यथा घनीभूतप्रकाश एव सूर्यमण्डलं तद्वद् इत्यर्थः इति स्वामिचरणाः ।सूर्यस्य तेजोरूपत्वेऽपि यथा तेजस आश्रयत्वम् अप्युच्यते ।एवं मे कृष्णस्य ब्रह्मरूपत्वेऽपि ब्रह्मणः प्रतिष्ठात्वम् अपि ।अत्र श्रीविष्णुपुराणम् अपि प्रमाणम् शुभाश्रयः स चित्तस्य सर्वगस्य तथात्मनः इति व्याघातं च तत्रापि स्वामिचरणैः ।सर्वगस्यात्मनः परब्रह्मणोऽपि आश्रयः प्रतिष्ठा ।तद् उक्तं भगवता ब्रह्मणो हि प्रतिष्ठाहम् इति ।तथा विष्णुधर्मेऽपि नर्कद्वादशीप्रसङ्गे

प्रकृतौ पुरुषे चैव
ब्रह्मण्यपि स प्रभुः ।
यथैक एव पुरुषो
वासुदेवो व्यवस्थितः ॥इति ।

तत्रैव मासर्क्षपूजाप्रसङ्गे

यथाच्युतत्वं परतः परस्मात्
स ब्रह्मभूतात् परतः परात्मा । इति ।

तथा हरिवंशेऽपि विप्रकुमारानयनप्रसङ्गे अर्जुनं प्रति श्रीभगवद्वाक्यं

तत्परं परमं ब्रह्म
सर्वं विभजते जगत् ।
ममैव तद् घनं तेजो
ज्ञातुम् अर्हसि भारत ॥ (ह.व. २.११४.११-१२)

ब्रह्मसंहितायाम् अपि (५.४०)

यस्य प्रभा प्रभवतो जगदण्डकोटि
कोटीष्वशेषवसुधादिविभूतिभिन्नम् ।
तद् ब्रह्म निष्कलम् अनन्तम् अशेषभूतं
गोविन्दम् आदिपुरुषं तम् अहं भजामि ॥ इति ।

अष्टमस्कन्धे च (८.२४.३८)

मदीयं महिमानंच् च
परब्रह्मेति शब्दितम् ।
वेत्स्यस्यनुगृहीतं मे
सम्प्रश्नैर् विवृतं हृदि ॥ इति भगवदुक्तिश्च ।

मधुसूदनसरस्वतीपादाश्च व्याचक्षते स्म यथा ननु त्वद्भक्तस्त्वद्भावम् आप्नोतु नाम कथं ब्रह्मभूयाय कल्पते ब्रह्मणः सकाशात् तवान्यत्वाद् इत्याशङ्क्याह ब्रह्मणो हीति । प्रतिष्ठा पर्याप्तिर् अहम् एवेति । पर्याप्तिः परिपूर्णता इत्यमरः ।

पराकृतमनोद्वन्द्वं
परं ब्रह्म नराकृति ।
सौन्दर्यसारसर्वस्वं
वन्दे नन्दात्मजं महः ॥ इत्युपश्लोकयामासुश्च ॥

अनर्थ एव त्रैगुण्यं

निस्त्रैगुण्यं कृतार्थता ।
तच् च भक्त्यैव भवतीत्य्
अध्यायार्थो निरूपितः ॥

इति सारार्थवर्षिण्यां
हर्षिण्यां भक्तचेतसाम् ।
चतुर्दशोऽयं गीतासु
सङ्गतः सङ्गतः सताम् ॥

**बलदेवः** ननु तद्विवेकख्यात्या त्वदेकभक्त्या च गुणातीतो लब्धस्वरूपो ब्रह्मशब्दितो मुक्तः कथं तिष्ठेद् इति चेत् तत्राह ब्रह्मणो हीति । हिर् निश्चये । ब्रह्मणस्तत्पूर्वकया तया सत्त्वाद्यावरणात्ययाद् आविर्भावितस्वगुणाष्टकस्यामृतस्य मृइतिर् निर्गतस्याव्ययस्य तादूप्यणैकरसस्य मुक्तस्य मदतिप्रियस्याहम् एव विज्ञानानन्दमूर्तिर् अनन्तगुणो निरवद्यः सुहृततमः सर्वेश्वरः । प्रतिष्ठा प्रतिष्ठीयतेऽत्र इति निरुक्तेः परमाश्रयोऽतिप्रियो भवामीति तादृशं मां परया भक्त्यानुभवंस्तिष्ठतीति । न मत्तो विश्लेषलेशो न च पुनर् आवर्तते, यद् गत्वा न निवर्तन्ते मुक्तानां परमा गतिः इति स्मृतिभ्यः । ननु मुक्तस्त्वां कथं श्रयेत श्रवणफलस्य मुक्तेर् लाभाद् इति चेद् अस्त्यतिशयितं फलम् इति भावेनाह शाश्वतस्य साधारणस्य सुखस्य च विचित्रलीलारसस्याहम् एव प्रतिष्ठेति । तीव्रानन्दरूपतद्विभूतिमल्लीलानुभवाय माम् एव समाश्रयतीत्येवम् आह श्रुतिः रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति इति ॥ २७ ॥

संसारो गुणयोगः स्याद्
विमोक्षस्तु गुणात्ययः ।
तत्सिद्धिर् हरिभक्त्यैवेत्य्
एतद् बुद्धं चतुर्दशात् ॥

इति श्रीमद्भगवद्गीतोपनिषद्भाष्ये चतुर्दशोऽध्यायः ॥ १४ ॥